# Rudrapanchakam

# રુદ્રપઞ્ચકમ્

## Document Information

Text title : Rudra Panchakam Five Suktas related to Rudra devatA

File name : rudrapanchakam.itx

Category : shiva, veda

Location : doc_shiva

Transliterated by : NA

Proofread by : Sneha Sudha snehasudha13 at gmail.com, NA

Latest update : June 2, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Rudrapanchakam

# રુદ્રપઞ્ચકમ્

## રુદ્રમન્ત્રકસૂક્તં પ્રથમમ્

ૐ નમઃ શિવાય ।
પ્રણતોઽસ્મિ મહાદેવ પ્રપન્નોઽસ્મિ સદાશિવ ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥

દેવં સુધાકલશસોમકરં ત્રિનેત્રં
    પદ્માસનં ચ વરદાઽભયદં સુશુભ્રમ્ ।
શઙ્ખાઽભયાબ્જવરભૂષિતયા ચ દેવ્યા
    વામેઽઙ્કિતં શમનભઙ્ગહરં નમામિ ॥

શુદ્ધસ્ફટિકસઙ્કાશં ત્રિનેત્રં પઞ્ચવક્ત્રકમ્ ।
ગઙ્ગાધરં દશભુજં સર્વાભરણભૂષિતમ્ ॥ ૧॥

નીલગ્રીવં શશાઙ્કાઙ્કં નાગયજ્ઞોપવીતિનમ્ ।
વ્યાઘ્રચર્મોત્તરીયં ચ વરેણ્યમભયપ્રદમ્ ॥ ૨॥

કમણ્ડલ્વક્ષસૂત્રાભ્યામન્વિતં શૂલપાણિકમ્ ।
જ્વલન્તં પિઙ્ગલજટાશિખમુદ્યોતકારિણમ્ ॥ ૩॥

અમૃતેનાપ્લુતં હૃષ્ટમુમાદેહાર્ધધારિણમ્ ।
દિવ્યસિંહાસનાસીનં દિવ્યભોગસમન્વિતમ્ ॥ ૪॥

દિગ્દેવતાસમાયુક્તં સુરાસુરનમસ્કૃતમ્ ।
નિત્યં ચ શાશ્વતં શુદ્ધં ધ્રુવમક્ષરમઽવ્યયમ્ ॥ ૫॥

સર્વવ્યાપિનમીશાનં રુદ્રં વૈ વિશ્વરૂપિણમ્ ।
એવં ધ્યાત્વા દ્વિજઃ સમ્યક્તતો યજનમારભેત્ ॥ ૬॥

મૃત્યુઞ્જય મહાદેવ પાહિ માં શરણાગતમ્ ।
જન્મમૃત્યુજરારોગૈઃ પીડિતં ભવબન્ધનાત્ ॥ ૭॥

આરાધિતો મનુષ્યૈસ્ત્વં સિદ્ધૈર્દેવૈર્મહર્ષિભિઃ ।
આવાહયામિ ભક્ત્યા ત્વાં ગૃહાણાર્ચાં મહેશ્વર ॥ ૮॥

હર શમ્ભો મહાદેવ વિશ્વેશામરવલ્લભ ।
શિવ શઙ્કર સર્વાત્મન્ નીલકણ્ઠ નમોઽસ્તુ તે ॥ ૯॥

ઇતિ વિજ્ઞાપ્ય દેવેશં જપેન્મન્ત્રં ચ ત્ર્યમ્બકમ્ ॥ ૧૦॥

ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિં રયિપોષણમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય માઽમૃતાત્ ॥

ૐ આત્વા વહન્તુ હરયઃ સચેતસઃ શ્વેતૈરશ્વૈરિહ કેતુમદ્ભિર્વાતાજવેન
બલમદ્ભિર્મનોજવા યાન્તુ શીઘ્રં મમ રુદ્રાય હવ્યન્દેવાનાં ચ ઋષીણાં
ચાસુરાણાં ચ પૂર્વજં સહસ્રાક્ષં વિરૂપાક્ષં વિશ્વરૂપં
મહાદેવ શિવમાવાહયામ્યહમ્ ॥

આવાહયામ્યહં દેવમીશ્વરં પાર્વતીપતિમ્ ।
વૃષભાસનમારૂઢં નાગાભરણભૂષિતમ્ ॥

પ્રીયતાં યજમાનસ્ય તુષ્ટો ભૂયાજ્જગત્પતિઃ ।
શુક્લવર્ણો મહાતેજાઃ શુક્લસ્રગ્દામભૂષિતઃ ।
બલિઃ પુણ્યં ચરુશ્ચૈવ ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥

ૐ તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ ।
તન્નો રુદ્રઃ પ્રચોદયાત્ ॥ ૩॥

ૐ શતરુદ્રિયન્દેવાનાં રુદ્રશમનં ભવાય શર્વીયશ્ચ
પ્રત્યુત્ક્રાન્તાનુવાકૌ દેવર્ષી રુદ્રદૈવત્યસ્ત્રિષ્ટુપ્ચ્છન્દશ્ચયને
વિનિયોગઃ,
નમસ્તે દેવા રૌદ્રમાનુષ્ટુભમાદ્યા ગાયત્રી પઞ્ચમષષ્ઠ્યૌ
પાંક્ત્યન્તા મહાપઙ્ક્તિર્મા ભૈરેકપદા જગત્યનુષ્ટુપ ત્રિષ્ટુપ્ મહાબૃહતી
યવમધ્યા રુદ્રો દેવતા ચરુમેષ્ટિકા, અસ્ય રુદ્રસ્ય પ્રશ્નસ્ય
અનુષ્ટુપચ્છન્દઃ અઘોર ઋષિ સઙ્કર્ષણમૂર્તિઃ સુરૂપો યોઽસાવાદિત્યઃ
પરઃપુરુષઃ સએવ દેવતા, અગ્નિઃ ક્રતુચરુમાયામિષ્ટિકાયાં
શતરુદ્રે વિનિયોગઃ, સકલસ્ય રુદ્રાધ્યાયસ્ય શ્રીમહારુદ્રો
દેવતા એકા ગાયત્રી છન્દસ્તિસ્રોઽનુષ્ટુભસ્તિસ્રઃ પઙ્ક્ત્યઃ
સપ્તાઽનુષ્ટુભૌ દ્વે જગત્યૌ પરમેષ્ઠી ઋષિઃ । આત્મનો

વાઙ્મનઃ કાયોપાર્જિતપાપનિવારણાર્થમમુકકામનાસિદ્ધ્યર્થે
રુદ્રમન્ત્રપાઠે હોમે સ્નાને પુષ્પાર્ચને વા વિનિયોગઃ ॥

ૐ કર્પૂરગૌરં કરુણાવતારં સંસારસારં ભુજગેન્દ્રહારમ્ ।
સદા રમન્તં હૃદયારવિન્દે ભવં ભવાનીસહિતં નમામિ ॥

ૐ નમસ્તે રુદ્ર મન્યવે બાહુભ્યામુત તે નમ ઉત ત ઇષવે નમઃ।
યા તે રુદ્ર શિવા તનૂરઽઘોરા પાપકાશિની ।
તયા નસ્તન્વાશન્તમયા ગિરિશન્તાઽભિચાકશીહિ ।
યામિષુઙ્ગિરિશન્ત! હસ્તે બિભર્ષ્યઽસ્તવે ।
શિવાં ગિરિત્ર તાઙ્કુરુ માહિંસીઃ પુરુષં જગત્ ।
શિવેન વચસા ત્વા ગિરિશાચ્છા વદામસિ ।
યથા નઃ સર્વમિજ્જગદઽયક્ષ્મં સુમના અસત્ ।
અધ્યવોચદધિવક્તા પ્રથમો દૈવ્યો ભિષક્ ।
અહીંશ્ચ સર્વાઞ્જમ્ભય સર્વાંશ્ચ યાતુધાન્યોઽધરાચીઃ પરાત્સુવઃ ।
અસૌ યસ્તામ્રો અરુણ ઉત બભ્રુઃ સુમઙ્ગલઃ ।
યે ચેમે રુદ્રા અભિતો દિક્ષુ શ્રિતાઃ સહસ્રશો વૈષાં હેઽ ઈમહે ।
અસૌ યોઽવસર્પતિ નીલગ્રીવો વિલોહિતઃ ।
ઉતૈનં ગોપા અદૃશ્યન્નુતૈનમુદહાર્યઃ ।
ઉતૈનં વિશ્વા ભૂતાનિ સ દૃષ્ટો મૃડયાતિ નઃ ।
નમો અસ્તુ નીલગ્રીવાય સહસ્રાક્ષાય મીઢુષે ।
અથો ય અસ્ય સત્ત્વાનોઽહન્તેભ્યોઽકરં નમઃ ।
પ્રમુઞ્ચ ધન્વનસ્તમુભયોરર્ત્ન્યોર્જ્યામ્ ।
યાશ્ચ તે હસ્ત ઇષવઃ પરસ્તા ભગવો વપ ।
વિજ્યં ધનુઃ કપર્દિનો વિશલ્યો બાણવાનુત ॥ ૧॥

અનેશન્નસ્યેષવ આભૂરસ્ય નિષઙ્ગથિઃ ।
યા તે હેતિર્મીઢુષ્ટમ હસ્તે બભૂવ તે ધનુઃ ।
તયાઽસ્માન્વિશ્વતસ્ત્વમયક્ષ્મેણ પરિભુજ ।
પરિ તે ધન્વનો હેતિરસ્માન્વૃણક્તુ વિશ્વતઃ ।
અથો ય ઇષુધિસ્તવારે અસ્મન્નિધીહિ તમ્ ।
નમાંસિ ત આયુધાયાઽનાતતાય ધૃષ્ણવે ।
ઉભાભ્યામુત તે નમો બાહુભ્યાં તવ ધન્વને ।
અવતત્ય ધનુષ્ટ્વં સહસ્રાક્ષ શતેષુધે ।

નિશીર્ય શલ્યાનાં મુખં શિવો નઃ સુમના ભવ ।
યા ત ઇષુઃ શિવતમા શિવં બભૂવ તે ધનુઃ ।
શિવા શરવ્યા યા તવ તયા નો મૃડ જીવસે ॥ ૨॥

ૐ નમો હિરણ્યબાહવે સેનાન્યે દિશાં ચ પતયે નમો,
નમો વૃક્ષેભ્યો હરિકેશેભ્યઃ પશૂનાં પતયે નમો,
નમઃ શિષ્પિઞ્જરાય ત્વિષીમતે પથીનામ્પતયે નમો,
નમો બભ્લુષાય વ્યાધિનેઽન્નાનામ્પતયે નમો,
નમો હરિકેશાયોપવીતિને પુષ્ટાનાં પતયે નમો,
નમો ભવસ્ય હેત્યૈ જગતસ્પતયે નમો,
નમો રુદ્રાયાઽતતાયિને ક્ષેત્રાણામ્પતયે નમો,
નમઃ સૂતાયાઽહન્ત્યાય વનાનાં પતયે નમો,
નમો રોહિતાય સ્થપતયે વૃક્ષાણાં પતયે નમો,
નમો મન્ત્રિણે વાણિજ્યાય કક્ષ્યાણાં પતયે નમો,
નમો ભુવન્તયે વારિવસ્કૃતાયૌષધીનાં પતયે નમઃ ॥

નમ આક્રન્દાય ત ઉચ્ચૈર્ઘોષાય સત્ત્વાનાં પતયે નમો,
નમઃ કૃત્સંવીતાય ધાવતે પત્તીનાં પતયે નમો,
નમઃ સહમાનાય નિવ્યાધિન આવ્યાધિનીનાં પતયે નમો,
નમો નિષઙ્ગિણે કકુભાય સ્તેનાનાં પતયે નમો,
નમો વઞ્ચતે પરિવઞ્ચતે સ્તાયૂનાં પતયે નમો,
નમો નિચરાય પરિચરાયાઽરણ્યાનાં પતયે નમો,
નમો નિષઙ્ગિણ ઇષુધિમતે તસ્કરાણાં પતયે નમો,
નમઃ સૃકાયિભ્યો જિઘાંસદ્ભ્યો મુષ્ણતાં પતયે નમો,
નમોઽસિમદ્ભ્યો નક્તઞ્ચરદ્ભ્યઃ પ્રકૃન્તાનાં પતયે નમો,
નમ ઉષ્ણીષિણે ગિરિચરાય કુલુઞ્ચાનાં પતયે નમો ॥

નમ ઇષુકૃદ્ભ્યો ધન્વકૃદ્ભ્યશ્ચવો નમો,
નમ ઇષુમદ્ભ્યો ધન્વાયિદ્ભ્યશ્ચ વો નમો,
નમ આતન્વાનેભ્યઃ પ્રતિદધાનેભ્યશ્ચ વો નમો,
નમ આયચ્છદ્ભ્યોઽસ્યદ્ભ્યશ્ચ વો નમો,
નમો વિસૃજદ્ભ્યો વિધ્યદ્ભ્યશ્ચ વો નમો,
નમઃ સ્વપદ્ભ્યો જાગ્રદ્ભ્યશ્ચ વો નમો,
નમઃ શયાનેભ્ય આસીનેભ્યશ્ચ વો નમો,

નમસ્તિષ્ઠદ્ભ્યો ધાવદ્ભ્યશ્ચ વો નમો,
નમઃ સભાભ્યઃ સભાપતિભ્યશ્ચ વો નમો,
નમોઽશ્વેભ્યોઽશ્વપતિભ્યશ્ચ વો નમો,
નમ આવ્યાધિનીભ્યો વિવિધ્યદ્ભ્યશ્ચ વો નમો,
નમ ઉગણાભ્યસ્તૃંહતીભ્યશ્ચ વો નમો,
નમો વ્રાતેભ્યો વ્રાતપતિભ્યશ્ચ વો નમો,
નમો ગણેભ્યો ગણપતિભ્યશ્ચ વો નમો,
નમઃ કૃચ્છ્રેભ્યઃ કૃચ્છ્રપતિભ્યશ્ચ વો નભો,
નમો વિરૂપેભ્યો વિશ્વરૂપેભ્યશ્ચ વો નમો,
નમઃ સેનાભ્યઃ સેનાનીભ્યશ્ચ વો નમો,
નમો રથેભ્યો વરૂથિભ્યશ્ચ વો નમો,
નમો મહદ્ભ્યોઽર્ભકેભ્યશ્ચ નમો,
નમો યુવભ્ય આશિનેભ્યશ્ચ વો નમો,
નમઃ ક્ષતૃદ્ભ્યઃ સઙ્ગૃહીતૃભ્યશ્ચ વો નમો,
નમસ્તક્ષભ્યો રથકારેભ્યશ્ચ વો નમો,
નમઃ કુલાલેભ્યઃ કર્મારેભ્યશ્ચ વો નમો,
નમઃ પુઞ્જિષ્ઠેભ્યો નિષાદેભ્યશ્ચ વો નમો,
નમઃ શ્વનિભ્યો મૃગયુભ્યશ્ચ વો નમો,
નમઃ શ્વભ્યઃ શ્વપતિભ્યશ્ચ વો નમઃ ॥

નમો ભવાય ચ રુદ્રાય ચ,
નમઃ શર્વાય ચ પશુપતયે ચ,
નમો નીલગ્રીવાય ચ શિતિકણ્ઠાય ચ,
નમો વ્યુપ્તકેશાય ચ કપર્દિને ચ,
નમઃ સહસ્રાક્ષાય ચ શતધન્વને ચ ॥

નમો ગિરિશાય ચ શિપિવિષ્ટાય ચ,
નમો મીઢુષ્ટમાય ચેષુમતે ચ,
નમો હ્રસ્વાય ચ વામનાય ચ,
નમો બૃહતે ચ વર્ષીયસે ચ,
નમો વૃદ્ધાય ચ સંવૃધ્વને ચ,
નમોઽગ્ર્યાય ચ પ્રથમાય ચ,
નમ આશવે ચાઽજિરાય ચ,

નમઃ શીભ્યાય ચ શીઘ્યાય ચ,
નમ ઊર્મ્યાય ચાઽવસ્વન્યાય ચ,
નમો નાદ્યાય ચ દ્વીપ્યાય ચ ॥

નમો જ્યેષ્ઠાય ચ કનિષ્ઠાય ચ,
નમઃ પૂર્વજાય ચાપરજાય ચ,
નમો મધ્યમાય ચાઽપ્રગલ્ભાય ચ,
નમો બુધ્ન્યાય ચ જઘન્યાય ચ,
નમઃ સોભ્યાય ચ પ્રતિસર્યાય ચ,
નમ આશુષેણાય ચાશુરથાય ચ ॥

નમો બિલ્મિને ચ કવચિને ચ,
નમો વર્મિણે ચ વરૂથિને ચ,
નમઃ શૂરાય ચાવભેદિને ચ,
નમઃ શ્રુતાય ચ શ્રુતસેનાય ચ,
નમો યામ્યાય ચ ક્ષેમ્યાય ચ,
નમ ઉર્વર્યાય ચ ખલ્યાય ચ,
નમઃ શ્લોક્યાય ચાવસાન્યાય ચ,
નમઃ શ્રવાય ચ પ્રતિશ્રવાય ચ,
નમો વન્યાય ચ કક્ષ્યાય ચ,
નમો દુન્દુભ્યાય ચાઽહનન્યાય ચ,
નમો ધૃષ્ણવે ચ પ્રમૃશાય ચ,
નમો નિષઙ્ગિણે ચેષુધિમતે ચ,
નમસ્તીક્ષ્ણેષવે ચાયુધિને ચ,
નમઃ સાયુધાયચ સુધન્વનેચ ॥

નમઃ સૃત્યાય ચ પથ્યાય ચ,
નમઃ કાટ્યાય ચ નીપ્યાય ચ,
નમો નાદ્યાય ચ વૈશન્તાય ચ,
નમઃ કુલ્યાય ચ સરસ્યાય ચ,
નમઃ કૂટ્યાય ચાવટ્યાય ચ,
નમો વર્ષ્યાય ચાઽવર્ષ્યાય ચ,
નમો મેઘ્યાય ચ વિદ્યુત્યાય ચ,
નમો વીધ્યાય ચાતપ્યાય ચ,

નમો વાત્યાય ચ રેષ્મ્યાય ચ,
નમો વાસ્તવ્યાય ચ વાસ્તુપાય ચ ॥

નમઃ સોમાય ચ રુદ્રાય ચ નમસ્તામ્રાય ચારુણાય ચ,
નમઃ શઙ્ગવે ચ પશુપતયે ચ,
નમ ઉગ્રાય ચ ભીમાય ચ,
નમો હન્ત્રે ચ હનીયસે ચ,
નમોઽગ્રેવધાય ચ દૂરેવધાય ચ,
નમો વૃક્ષેભ્યો હરિકેશેભ્યો, નમસ્તારાય,
નમઃ શમ્ભવે ચ મયોભવે ચ, નમઃ શઙ્કરાય ચ, મયસ્કરાય ચ ॥

નમઃ શિવાય ચ શિવતરાય ચ, નમઃ કિંશલ્યાય ચ ક્ષયણાય ચ ॥

નમ ઇરિણ્યાય ચ પ્રપથ્યાય ચ, નમઃ પુલસ્તિને ચ કપર્દિને ચ,
નમો ગોષ્ઠ્યાય ચ ગૃહ્યાય ચ, નમસ્તલ્પ્યાય ચ ગેહ્યાય ચ, નમઃ
પર્યાયચાવર્યાય ચ, નમઃ પ્રતરણાય ચોત્તરણાય ચ, નમસ્તીર્થ્યાય
ચ કુલ્યાય ચ, નમઃ ફેન્યાય ચ શષ્પ્યાય ચ, નમઃ સિકત્યાય ચ
પ્રવાહ્યાય ચ , નમો હૃદય્યાય ચ નિવેષ્પ્યાય ચ, નમઃ કાટ્યાય ચ
ગહ્વરેષ્ઠ્યાય ચ, નમઃ શુષ્ક્યાય ચ હરિત્યાય ચ, નમો લોપ્યાય
ચોલપ્યાય ચ, નમઃ પાંસવ્યાય ચ રજસ્યાય ચ નમઃ સૂર્મ્યાય ચોર્મ્યાય
ચ, નમઃ પણ્ર્યાય ચ પર્ણશાદાય ચ, નમ આખિદતે ચ પ્રખિદતે ચ,
નમોઽભિઘ્નતે ચાપગુરમાણાય ચ, નમ આખિદાય ચ વિખિદાય ચ નમો
વઃ કિરિકેભ્યો દેવાનાં હૃદયેભ્યો, નમો વિચિનુત્કેભ્યો, નમો વિક્ષીણકેભ્યો
નમ આનિર્હતેભ્યઃ ॥

દ્રાપે અન્ધસસ્પતે દરિદ્ર નીલલોહિત, આસાં પ્રજાનામેષાં પુરુષાણામેષાં
પશૂનાં માભેર્મા રુઙ્મા નઃ કિઞ્ચનાઽમમત્ । ઇમા રુદ્રાય તવસે
કપર્દિને ક્ષયદ્વીરાય પ્રભરામહે મતીઃ । યથા નઃ શમઽસદ્દ્વિપદે
ચતુષ્પદે વિશ્વં પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્ । યા તે રુદ્ર શિવા તનૂઃ
શિવા વિશ્વાહ ભેષજીઃ, શિવારુદ્રસ્ય ભેષજી તયા નો મૃડ જીવસે ।
પરિ ણો રુદ્રસ્ય હેતિર્વૃણક્તુ પરિત્વેષસ્ય દુર્મતેરઘાયોઃ, અવસ્થિરા
મઘવદ્ભ્યસ્તનુષુ મીઢ્વસ્તોકાય તનયાય મૃડ । મીઢુષ્ટમ શિવતમ શિવો
નઃ સુમના ભવ, પરમે વૃક્ષ આયુધન્નિધાય કૃત્તિં વસાન આચર
પિનાકમ્ । બિભ્રદુચ્ચર વિકિરિલ વિલોહિત નમસ્તે અસ્તુ ભગવઃ, યાસ્તે

સહસ્રં હેતયોઽન્યેઽસ્મિન્નિવ પાન્તુ તાઃ ॥

સહસ્રધા સહસ્રાણિ હેતયસ્તવ બાહ્વોઃ ।
તાસામીશાનો ભગવઃ પરાચીના મુખાકુરુ ॥

અસઙ્ખ્યાતાઃ સહસ્રાણિ યે રુદ્રા અધિભૂમ્યામ્ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૧॥

યેઽસ્મિન્મહત્યઽર્ણવેઽન્તતરિક્ષે ભવા અધિ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૨॥

યે નીલગ્રીવાઃ શિતિકણ્ઠા દિવં રુદ્રા ઉપાશ્રિતાઃ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૩॥

યે નીલગ્રીવાઃ શિતિકણ્ઠાઃ શર્વા અધઃક્ષમાચરાઃ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૪॥

યે વનેષુ શિષ્પિઞ્જરા નીલગ્રીવા વિલોહિતાઃ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૫॥

યેઽન્નેષુ વિવિધ્યન્તિ પાત્રેષુ પિબતો જનાન્ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૬॥

યે ભૂતાનામધિપતયો વિશિખાસઃ કપર્દિનઃ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૭॥

યે પથીનાં પથિ રક્ષય ઐડ મૃદાય વ્યુધઃ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૮॥

યે તીર્થાનિ પ્રચરન્તિ સૃકાવન્તો નિષઙ્ગિણઃ ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૯॥

ય એતાવન્તો વા ભૂયાંસો વા દિશો રુદ્રા વિતિષ્ઠિરે ।
તેષાં સહસ્રયોજનેઽવ ધન્વાનિ તન્મસિ ॥ ૧૦॥

ૐ નમો અસ્તુ રુદ્રેભ્યો યે દિવિ, યેષાં વર્ષમિપવસ્તેભ્યો દશ
પ્રાચીર્દશ દક્ષિણા દશ પ્રતીચીર્દશોદીચીર્દશોર્ધ્વાસ્તેભ્યો નમો
અસ્તુ, તે નો મૃડયન્તુ, તે યં દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તમેષાં
જમ્ભે દધ્મઃ ॥ ૧॥

ૐ નમો અસ્તુ રુદ્રેભ્યો યે અન્તરિક્ષે, યેષાં વાતમિષવસ્તેભ્યો દશ

પ્રાચીર્દશ દક્ષિણા દશ પ્રતીચીર્દશોદીચીર્દશોર્ધ્વાસ્તેભ્યો નમો
અસ્તુ, તે નો મૃડયન્તુ તે યં દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તમેષાં જમ્ભે
દધ્મઃ ॥ ૨॥

ૐ નમો અસ્તુ રુદ્રેભ્યો યે પૃથિવ્યાં યેષામઽન્નમિષવસ્તેભ્યો, દશ
પ્રાચીર્દશ દક્ષિણા દશ પ્રતીચીર્દશોદીચીર્દશોર્ધ્વાસ્તેભ્યો નમો
અસ્તુ તે નો મૃડયન્તુ તે યં દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તમેષાં જમ્ભે
દધ્મઃ ॥ ૩॥

ઇતિ રુદ્રમન્ત્રસૂક્તં પ્રથમમ્ ।

# રુદ્રપઞ્ચકમ્

## શતાધ્યાયમન્ત્રસૂક્તં દ્વિતીયમ્

ૐ દેવં તામરસાનનં શશિકલાલઙ્કારમઙ્કારમચ્છ-
ઙ્ખામ્ભોજલસદ્વરાભયમહાલક્ષ્મીસમુદ્ભાસિતમ્ ।
સવ્યાસવ્યકદોર્વરાભયસુધાકુમ્ભેન્દુમિન્દ્રલ્લસત્-
સૌમ્યાસ્યં ચ ચતુર્ભુજં ચ ભગવન્નેત્રં ત્રિનેત્રં સ્તુમઃ ॥ ૧॥

ચન્દ્રાર્કાગ્નિવિલોચનં સ્મિતમુખં પદ્મદ્વયાન્તઃસ્થિતં
મુદ્રાપાશસુધાક્ષસૂત્રવિલસત્પાણિં હિમાંશુપ્રભમ્ ।
કોટીરેન્દુગલત્સુધાપ્લુતતનું હારાદિભૂષોજ્જ્વલં
કાન્ત્યા વિશ્વવિમોહનં પશુપતિં મૃત્યુઞ્જયં ભાવયે ॥ ૨॥

“ઇમા રુદ્રૈકાદશ વાસિષ્ઠૈકાદશ દેવતા ભૂર્ભુવઃ ।
સ્વશ્ચક્ષુષા રૂપાણિ વયમિત્યાઙ્ગિરસસ્યૈશાનાઃ” ॥

ૐ ઇમા રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્રભરામહે મતીઃ ।
યથા નઃ શમસદ્વિપદે ચતુષ્પદે વિશ્વં
પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્ ॥ ૧॥

મૃડા નો રુદ્રો તનો મયસ્કૃધિ ક્ષયદ્વીરાય નમસા વિધેમ તે ।
યચ્છઞ્ચયોશ્ચ મનુરાયેજે પિતા તદશ્યામ તવ રુદ્ર પ્રણીતિષુ ॥ ૨॥

અશ્યામ તે સુમતિં દેવયજ્યયા ક્ષયદ્વીરસ્ય તવ રુદ્ર મીઢ્વઃ ।
સુમ્નાયન્નિદ્વિષો અસ્માકમાઽચરારિષ્ટિવીરા જુહુવામ તે હવિઃ ॥ ૩॥

ત્વેષં વયં રુદ્રં યજ્ઞં સાધનમઽઙ્કુવિમવસે નિહ્વયામહે ।
આરે અસ્મદ્દૈવ્યં હેડો અસ્યતુ સુમતિમિદ્વયમઽસ્યા વૃણીમહે ॥ ૪॥

દિવો વરાહમરુષં કપર્દિનં ત્વેષં રૂપં નમસા નિહ્વયામહે ।
હસ્તે વિભ્રદ્ભેષજા વાર્યાણિ શર્મ વર્મચ્છુર્દિરસ્મભ્યં વિયંસત્ ॥ ૫॥

ઇદં પિત્રે મરુતામુચ્યતે વચઃ સ્વાદોઃ સ્વાદીયો રુદ્રાય વર્ધનમ્ ।
રાસ્વાચ નો અમૃતમર્ત્યભોજનં ત્મને તોકાય તનયાય મૃડ ॥ ૬॥

મૃલ ત્વમસ્મભ્યં રુદ્રૈતદડસ્તુ હુતં તવ ।
પશુનસ્માકં માહિંસીરેતદડસ્મા અસદ્ધુતમ્ ॥ ૭॥

માનો મહાન્તમુત માનો અર્ભકં માન ઉક્ષન્તમુત માન ઉક્ષિતમ્ ।
માનો વધીઃ પિતરં મોત માતરં માનઃ પ્રિયાસ્તન્વો રુદ્ર રીરિષઃ ॥ ૮॥

મા નસ્તોકે તનયે મા ન આયૌ માનો ગોષુ મા ન અશ્વેષુ રીરિષઃ ।
વીરાન્માનો રુદ્ર ભામિતો વધીર્હવિષ્મન્તો નમસા વિધેમ તે ॥ ૯॥

ઉપ તે સ્તોમન્પશુપા ઇવાકરં રાસ્વા પિતર્મરુતાં સુમ્નમસ્મે ।
ભદ્રા હિ તે સુમતિમૃડયત્તમાથા વયમવ ઇત્તે વૃણીમહે ॥ ૧૦॥

આરે તે ગોઘ્નમુત પુરુષઘ્નં ક્ષયદ્વીર સુમ્નમસ્મે તે અસ્તુ ।
મૃડા ચનો અધિ ચ બ્રૂહિ દેવાધા ચ નઃ શર્મ યચ્છ દ્વિબર્હાઃ ॥ ૧૧॥

અવોચામ નમો અસ્મા અવસ્યવઃ શ‍ૃણવન્તુ નો હવ્યં રુદ્રો મરુત્વાન્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવીરુત દ્યૌઃ ॥ ૧૨॥

ત્વમગ્ને રુદ્રો અસુરો મહો દિવસ્ત્વં શર્ધો મરુતં પ્રખ્યા યશસે ।
ત્વં વાતૈરારુણૈર્યસ્તે શઙ્ગયસ્ત્વં પૂષા વિદત્તા પાસિ નુત્મના ॥

દેવા દેવેષુ શ્રયન્તાં, પ્રથમા દ્વિતીયેષુ શ્રયન્તાં,
દ્વિતીયાસ્તૃતીયેષુ શ્રયન્તાં, તૃતીયાશ્ચતુર્થેષુ શ્રયન્તાં,
ચતુર્થાઃ પઞ્ચમેષુ શ્રયન્તાં, પઞ્ચમાઃ ષષ્ઠેષુ શ્રયન્તાં ,
પષ્ઠાઃ સપ્તમેષુ શ્રયન્તાં, સપ્તમા અષ્ટમેષુ શ્રયન્તાં, અષ્ટમા
નવમેષુ શ્રયન્તાં, નવમા દશમેષુ શ્રયન્તાં, દશમા એકાદશેષુ
શ્રયન્તાં, દેવાસ્ત્રિરેકાદશાસ્ત્રયસ્ત્રિંશાઃ, ઉત્તરે ભવથોત્તરે
સત્ત્વાનો ઉત્તરવર્ત્માન ઉત્તરલક્ષ્માણો યઙ્કામયેદં જુહોમિ સ મે કામઃ
સમૃદ્ધ્યતાં વયં સ્યામ પતયો રયીણામ્ ॥

ૐ ભૂર્ભુવઃ સ્વઃ ક્ષુચ્ચ શુક્ચોષ્ણા ચોગ્રા ચ ભીમા ચ રાષ્ટ્રા ચ
બીભત્સા ચ વૈશન્તા ચ શાર્દૂરાકા ચાનિરાકા ચામીવાચા નાહુતિશ્ચ
નિરૃતિરેતાસ્તે અગ્નિવર્તિમતિસ્તન્વસ્તાભિસ્તં ગચ્છ યોડસ્માન્દ્વેષ્ટિ
યઞ્ચ વયં દ્વિષ્મસ્તમર્પય ॥

ભવા શર્વા મૃડતમા વિયાતં પશુપતી ભૂતપતી નમો વામ્ ।

પ્રતિહિતામયતામાવિસૃષ્ટં માનો હિંસિષ્ટં દ્વિપદો મા ચતુષ્પદઃ ।
શુને ક્રોષ્ટ્રે મા શરીરાણિ કર્તમારિક્લવેભ્યો ગૃધ્દ્રેભ્યો યે ચ કૃષ્ણા
અવસ્યવઃ । મક્ષિકાઃ પશુપતે વયાંસિ વિઘસે મા વિદન્તે । ક્રન્દાય તે
પ્રાણાય તે યાશ્ચ તે ભવ હેતયઃ । નમસ્તે ઉગ્રકર્મ સહસ્રાક્ષ મર્ત્ય
પુરસ્તાત્તે નમઃ । કૂર્મોધરાગુત્તરાદનુ, અમી વર્ગાદ્દિવસ્પર્યન્તરિક્ષાય
તે નમઃ, મુખાનિ તે પશુપતે યાનિ ચક્ષૂંષિ તે નમઃ, ત્વચે રૂપાય
સન્દૃશે પ્રતીચીનાય તે નમઃ, અઙ્ગેભ્યસ્ત ઉદરાય જિહ્વાયૈ દદ્ભ્યો
ગન્ધાય ઘ્રાણાય તે નમઃ । અહોરાત્રાણિ વિદધત્પ્રતીચીનાય તે નમઃ ।
અસ્ત્રાનીલકપર્દિને સહસ્રાક્ષેણ વાજિના, શર્વેણાઽધ્વગગાતિના તેન મા
સમરામસિ । ભવા ઈશ દ્વિપદો ભવ ઈશ ચતુષ્પદઃ, ભવો વિશ્વસ્ય
ભુવનસ્ય રાજતિ ભવાય ગાવ ઓષધીરજીગુર્ભવાય દ્યાવાપૃથિવી નમેતે ।
માનો રુદ્રા પરિ ણો વૃણોક્તુ હેત્યાપ ઇવાગ્નિઃ પરિણો વૃણક્તુ, માનોભિમાંસ્ત
નમો અસ્ત્વસ્મે, ચતુર્નમોષ્ટકૃત્વો ભવાય દશકૃત્વા પશુપતે નમસ્તે ।
યોઽભિયાતો નિલયતે ત્વં રુદ્ર નિચકીર્ષતિ, યો નઃ પશ્ચાદતિ પ્રયુઙ્ક્તે
તં વિદ્ધ્યસ્વ પદવીરિવ । નમઃ સાયં નમઃ પ્રાતર્નમો રાત્ર્યા નમો દિવઃ,
ભવાય ચ શર્વાય ચોભાભ્યામકરં નમઃ ॥

“અથ વાયોરેકાદશ પુરુષસ્યૈકાદશસ્ત્રીકસ્ય” ॥

પ્રભ્રાજમાનાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૧।
વ્યવજાતાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૨।
વાસુકિવૈદ્યુતાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૩।
રજતાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૪।
પુરુષાણાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૫।
શ્યામાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૬।
કપિલાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૭।
અતિલોહિતાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૮।
ઊર્ધ્વાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૯।
અવપતન્તાનાં રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૧૦।
વૈદ્યુતાના રુદ્રાણાં સ્થાને સ્વતેજસા ભાનિ । ૧૧।
ૐ ભૂર્ભુવઃસ્વઃરૂપાણિ વો મિથુનં મા વો મિથુનં રીઢ્વમ્” ॥

ૐ પ્રભ્રાજમાનાનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૧।
વ્યવજાતાનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૨।

વાસુકિવૈદ્યુતીનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૩।
રજતાનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૪।
પુરુષાણાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૫।
શ્યામાનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૬।
કપિલાનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૭।
અતિલોહિતાનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૮।
ઊર્ધ્વાનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૯।
અવપતન્તીનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૧૦।
વૈદ્યુતીનાં રુદ્રાણીનાં સ્થાને સ્વતેજસા ભાનિ । ૧૧।

“ૐ ભૂર્ભુવઃસ્વઃ સ્ત્રિયો વો મિથુનં મા વો મિથુનં રીઢ્વમ્” ॥

વયમગ્ને ધનવન્તઃસ્યામાલં યજ્ઞાયોત દક્ષિણાયૈ ગ્રાવા વદેદભિ
સોમસ્યાંશુમિન્દ્રં સિક્ષિમિન્દુના સુતેન ॥ ૧૩॥

રાયસ્પોષં નો દેહિ જાતવેદ ઊર્જો ભાગં મધુમત્સ્યાં ધૃતાવત્ ।
દધાન યજ્ઞં સુનવામ સોમં યજ્ઞેન ત્વામુપ શિક્ષેમ શક્ત ॥ ૧૪॥

ઈશાનન્ત્વા શુશ્રુમા વયં ધનાનાં ધનપતે ગોમદઽગ્ને ।
અશ્વવદ્ભૂરિ પુષ્ટં હિરણ્યવદ્ધનવદ્ધેહિ મહ્યમ્ ॥ ૧૫॥

દુહાન્તે દ્યૌઃ પૃથિવી પયોઽજગરસ્ત્વા સોદકો વિસર્પતુ ।
પ્રજાપતિનાઽત્માનમાપ્રીણેઽરિક્તો મ આત્મા ॥ ૧૬॥

“તેજોઽસિ” ।
યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ યો વનસ્પતિષુ ।
યો રુદ્રો વિશ્વા ભુવના વિવેશ તસ્મૈ રુદ્રાય નમો અસ્તુ દેવાઃ ।
મધ્યં પીત્વા ગુરુદારાંશ્ચ૦॥

ઇતિ શતાધ્યાયમન્ત્રસૂક્તં દ્વિતીયમ્ ।

# રુદ્રપઞ્ચકમ્

## ચમષટ્કમન્ત્રસૂક્તં તૃતીયમ્

ॐ ગાત્રં ભસ્મસિતં સિતં ચ હસિતં હસ્તે કપાલં સિતં
ખટ્વાઙ્ગં ચ સિતં સિતં ચ વૃષભં કર્ણે સિતે કુણ્ડલે ।
ગઙ્ગાફેનસિતો જટાજલસિતશ્ચન્દ્રઃ સિતો મૂર્ધનિ
સોઽયં સર્વસિતો દધાતુ વિભવં પાપક્ષયં શઙ્કરઃ ॥

"આશુઃ શિશાન ઇતિ શુક્રજ્યોતિષ્માનંશુઃ પ્રજનનં સર્વાઃ પ્રજાઃ
કશ્યપસ્ય વાજસ્ય પ્રસવોઽગ્નેઃ" ॥

ॐ આશુઃ શિશાનો વૃષભો ન યુધ્મો ઘનાઘનઃ ક્ષોભણશ્ચર્ષણીનામ્ ।
સઙ્ક્રન્દનોઽનિમિષ એકવીરઃ શતં સેના અજયત્સાકમિન્દ્રઃ ॥

સઙ્ક્રન્દનેનાઽનિમિષેણ જિષ્ણુના યુત્કારેણ દુશ્ચ્યવનેન ધૃષ્ણુના ।
તદિન્દ્રેણ જયત તત્સહધ્વં યુધો નર ઇષુહસ્તેન વૃષ્ણા ।
સ ઇષુહસ્તૈઃ સ નિષઙ્ગિભિર્વશી સંસૃષ્ટા સયુધ ઇન્દ્રો ગણેન ।
સંસૃષ્ટજિત્સોમપા બાહૂશર્ધ્યૂર્ધ્વધન્વા પ્રતિહિતાભિરસ્તા ॥

બૃહસ્પતે પરિદીયા રથેન રક્ષોહા મિત્રાઁ અપબાધમાનઃ ।
પ્રભઞ્જન્સેનાઃ પ્રમૃધો યુધા જયન્નઽસ્માકમેધ્યવિતા રથાનામ્ ॥

બલવિજ્ઞાયઃ સ્થવિરઃ પ્રવીરઃ સહસ્વાન્વાજી સહમાન ઉગ્રઃ ।
અભિવીરો અભિષત્વા સહોજિજ્જૈત્રાયનો રથમાઽતિષ્ઠ ગોવિત્ ॥

ગોત્રભિદઙ્ગોવિદં વજ્રબાહું જયન્તમઽજ્મા પ્રમૃણન્તમોજસા ।
ઇમં સ જાતા અનુવીરયધ્વમિન્દ્રસખાયમઽનુસંવ્યયધ્વમ્ ॥

અભિગોત્રાણિ સહસા ગાહમાનોઽદયો વીરઃ શતમન્યુરિન્દ્રઃ ।
દુશ્ચ્યવનઃ પૃતનાષાડઽયુધ્યોઽસ્માકં સેના અવન્તુ પ્રયત્સુ ॥

ઇન્દ્ર એષાં નેતા બૃહસ્પતિર્દક્ષિણો યજ્ઞઃ પુર એતુ સોમઃ ।

દેવસેનાનામભિભઞ્જતીનાં જયન્તીનાં મારુતો યન્તુ મધ્યે ॥

ઇન્દ્રસ્ય વૃષ્ણો વરુણસ્ય રાજ્ઞ આદિત્યાનાં મરુતાં શર્ધ ઉગ્રમ્ ।
મહામનસાં ભુવનસ્ય વાનાં ઘોષો દેવાનાં જયતામુદસ્થાત્ ॥

અસ્માકમિન્દ્રઃ સમૃતેષુ ધ્વજેષ્વઽસ્માકં યા ઇષવસ્તા જયન્તુ ।
અસ્માકં વીરા ઉત્તરે ભવન્ત્વઽસ્માન્નુ દેવા અવતા ભરેષ્વા ॥

"હોમ પર ખડા હોકે યહ આહુતિ દેના" ॥

ૐ શુક્રજ્યોતિશ્ચ ચિત્રજ્યોતિશ્ચ સત્યજ્યોતિશ્ચ
જ્યોતિષ્માંશ્ચ સત્યશ્ચર્તપાશ્ચાત્યઁહા ઈદૃઙ્ ચાન્યાદૃઙ્ચ સદૃઙ્ચ
પ્રતિસદૃઙ્ચ મિતશ્ચ સમ્મિતશ્ચ સભારા ઋતશ્ચ સત્યશ્ચ
ધ્રુવશ્ચ ધરણશ્ચ ધર્તા ચ વિધર્તા ચ વિધારય ઋતજિચ્ચ
સત્યજિચ્ચ સેનાજિચ્ચ સુષેણશ્ચાન્તિમિત્રશ્ચ દૂરે અમિત્રશ્ચ ગણ
ઈદૃશાસ એતાદૃક્ષાસ ઊષુણઃ સદૃક્ષાસઃ પ્રતિસદૃક્ષાસ એતાનમિતાસશ્ચ
સમ્મિતાસો નો અદ્ય સભારસો મરુતો યજ્ઞે અસ્મિન્નિન્દ્રં દૈવીર્વિશો મરુતોઽનુ
વર્ત્માનો યથેન્દ્રન્દૈવીર્વિશો મરુતોઽનુ વર્ત્માનોઽભવન્નેવમિમં યજમાનં
દૈવીશ્ચ વિશો માનુષીશ્ચાનુ વર્ત્માનો ભવન્તુ ॥

વાજશ્ચમે પ્રસવશ્ચમે પ્રયતિશ્ચમે પ્રસૃતિશ્ચમે ધીતિશ્ચમે
ક્રતુશ્ચમે સ્વરશ્ચ મે શ્લોકશ્ચમે શ્રાવશ્ચમે શ્રુતિશ્ચ મે
જ્યોતિશ્ચમે સ્વશ્ચમે પ્રાણશ્ચમે વ્યાનશ્ચમે અપાનશ્ચમે અસુશ્ચમે
ચિત્તં ચમ આધીતઞ્ચમે વાક્ચમે મનશ્ચમે ચક્ષુશ્ચમે શ્રોત્રં ચમે
દક્ષશ્ચમે બલઞ્ચમ ઓજશ્ચમે સહશ્ચમ આત્માચમે તનૂશ્ચમે શર્મ
ચમે વર્મ ચમે અઙ્ગાનિ ચમે અસ્થીનિ ચમે પરુંષિ ચમે શરીરાણિચમ
આયુશ્ચમે જરાચમે ॥

ૐ જ્યૈષ્ઠ્યઞ્ચમ આધિપત્યં ચમે, મન્યુશ્ચમે ભામશ્ચમે અમશ્ચમે
અમ્ભશ્ચમે જેમાચમે મહિમાચમે વરિમાચમે, પ્રથિમાચમે, વર્ષ્મા
ચમે, દ્રાઘ્વાચમે, વૃદ્ધઞ્ચમે, વૃદ્ધિશ્ચમે, સત્યઞ્ચમે,
શ્રદ્ધાચમે, જગચ્ચમે, ધનઞ્ચમે, ક્રીડાચમે, મોદશ્ચમે,
વશશ્ચમે, ત્વિપિશ્ચમે, સૂક્તઞ્ચમે, સુકૃતઞ્ચમે, જાતઞ્ચમે,
જનિષ્યમાણં ચમે, વિત્તઞ્ચમે, વેદ્યઞ્ચમે, ભૂતઞ્ચમે, ભવિષ્યં
ચમે, સુગઞ્ચમે, સુપથં ચમે, ઋદ્ધઞ્ચમ, ઋદ્ધિશ્ચમે,
ક્લૃપ્તં ચમે ક્લૃપ્તિશ્ચમે, મતિશ્ચમે સુમતિશ્ચમે ॥

ૐ શઞ્ચમે, મયશ્ચમે, પ્રિયશ્ચમે, અનુકામશ્ચમે, કામશ્ચમે,
સૌમનસશ્ચમે, ભગશ્ચમે, દ્રવિણં ચમે, ભદ્રઞ્ચમે,
શ્રેયશ્ચમે, વશ્યશ્ચમે, યશશ્ચમે, યન્તાચમે, ધર્તાચમે,
ક્ષેમચમે, ધૃતિશ્ચમે, સંવિચ્ચમે, જ્ઞાત્રઞ્ચમે, વિશ્વઞ્ચમે,
મહશ્ચમે, સૂશ્ચમે, પ્રસૂશ્ચમે, સીરઞ્ચમે, લયશ્ચમ,
ઋતઞ્ચમે, અમૃતઞ્ચમે, અયક્ષ્મચમે, અનામયઞ્ચમે,
જીવાતુશ્ચમે, દીર્ઘાયુષ્ત્વઞ્ચમે, અનમિત્રં ચ મે, અભયઞ્ચમે,
સુગઞ્ચમે, શયનઞ્ચમે, સૂષાચમે, સુદિનં ચમે ॥

ઉર્ક્ચમે, સૂનૃતાચમે, પયશ્ચભે, રસશ્ચમે, ઘૃતં ચ મે,
મધુચમે, સગ્ધિશ્ચમે, સપીતિશ્ચમે, કૃપિશ્ચમે, વૃષ્ટિશ્ચમે,
જૈત્રઞ્ચમ, ઔદ્ભિદચમે, રયિશ્ચમે, રાયશ્ચમે, પુષ્ટઞ્ચમે,
પુષ્ટિશ્ચમે, વિભુશ્ચમે, પ્રભુશ્ચમે, પૂર્ણઞ્ચમે, પૂર્ણતરઞ્ચમે,
કુયવઞ્ચમે, ક્ષિતિશ્ચમે, અન્નચમ ઇક્ષુશ્ચમે, વ્રીહયશ્ચમે,
યવાશ્ચમે, માષાશ્ચમે, તિલાશ્ચમે, નીવારાશ્ચમે, શ્યામકાશ્ચમે,
અણવશ્ચમે, પ્રિયઙ્ગવશ્ચમે, ગોધૂમાશ્ચમે, મસૂરાશ્ચમે,
મુદ્ગાશ્ચમે, ખલ્વાશ્ચમે ॥

અશ્મા ચ મે, મૃત્તિકા ચ મે, ગિરયશ્ચમે, પર્વતાશ્ચમે,
સિકતાશ્ચમે, વનસ્પતયશ્ચમે, હિરણ્યઞ્ચમે, અયશ્ચમે,
સીસઞ્ચમે, ત્રપુશ્ચમે, શ્યામઞ્ચમે, લોહિતાયસઞ્ચમે, અગ્નિશ્ચમ,
આપશ્ચમે, વીરુધશ્ચમ, ઓષધયશ્ચમે, કૃષ્ટપચ્યઞ્ચમે,
અકૃષ્ટપચ્યઞ્ચમે, ગ્રામ્યાશ્ચમે, પશવ આરણ્યાશ્ચમે,
વિત્તઞ્ચમે, વિત્તિશ્ચમે ભૂતઞ્ચમે, ભૂતિશ્ચમે, વસુચમે,
વસતિશ્ચમે, કર્મચમે, શક્તિશ્ચમે, અર્થશ્ચમ,
એમશ્ચમ, ઇત્યાચમે, ગતિશ્ચભે ॥

અગ્નિશ્ચમ ઇન્દ્રશ્ચમે, સોમશ્ચમ ઇન્દ્રશ્ચમે, સવિતાચમ
ઇન્દ્રશ્ચમે, સરસ્વતી ચમ ઇન્દ્રશ્ચમે, પુષા ચમ ઇન્દ્રશ્ચમે,
બૃહસ્પતિશ્ચમ ઇન્દ્રશ્ચમે, મિત્રશ્ચમ ઇન્દ્રશ્ચમે, વરુણશ્ચમ
ઇન્દ્રશ્ચમે, ધાતાચમ ઇન્દ્રશ્ચમે, ત્વષ્ટા ચમ ઇન્દ્રશ્ચમે,
મરુતશ્ચમ ઇન્દ્રશ્ચમે, વિશ્વેદાવાશ્ચમ ઇન્દ્રશ્ચમે પૃથિવીશ્ચમ
ઇન્દ્રશ્ચમે, અન્તરિક્ષં ચમ ઇન્દ્રશ્ચમે, દ્યૌશ્ચમ ઇન્દ્રશ્ચમે,
સમાશ્ચમ ઇન્દ્રશ્ચમે, નક્ષત્રાણિ ચમ ઇન્દ્રશ્ચમે, દિશશ્ચમ

ઇન્દ્રશ્ચમે ॥

અંશુશ્ચમે, રશ્મિશ્ચમે, દાભ્યશ્ચમે, અધિપતિશ્ચમ,
ઉપાંશુશ્ચમે, અન્તર્યામશ્ચમ, ઐન્દ્રવાયવશ્ચમે,
મૈત્રાવરુણશ્ચમ, આશ્વિનશ્ચમે, પ્રતિપ્રસ્થાનશ્ચમે શુક્રશ્ચમે,
મન્થીચમ, આગ્રાયણશ્ચમે, ક્ષુલ્લકવૈશ્વદેવશ્ચમે, ધ્રુવશ્ચમે,
વૈશ્વાનરશ્ચમ, ઐન્દ્રાગ્નશ્ચમે, વૈશ્વદેવશ્ચમે,
મરુત્વતીયશ્ચમે, મહેન્દ્રીયશ્ચમે, સાવિત્રશ્ચમે,
સારસ્વતશ્ચમે, પત્નીવતશ્ચમે, હારિયોજનશ્ચમે ॥

ઇધ્મા ચ મે, સ્રુચશ્ચમે, ચમસશ્ચમે,વાયવ્યાનિ ચ મે,
દ્રોણકલશશ્ચમે, પૂતભૃચ્ચમ, અપૂતભૃચ્ચમે ગ્રાવાણશ્ચમે,
અધિષવણશ્ચમે, અવભૃથશ્ચમે, સ્વગાકારશ્ચમે ॥

અગ્નિશ્ચમે, ઘર્મશ્ચમે, અર્કશ્ચમે, સૂર્યશ્ચમે, પ્રાણશ્ચમે,
અસ્વમેધશ્ચમે, પૃથિવીચમે, દિતિશ્ચમે, અદિતિશ્ચમે, દ્યૌશ્ચમે,
શક્વરીરઙ્ગુલયો, દિશશ્ચમે, યજ્ઞેન કલ્પતાં, વ્રતં ચર્તુશ્ચ
સંવત્સરશ્ચ, તપશ્ચાહોરાત્ર, ઊર્વષ્ઠીવે બૃહદ્રથન્તરશ્ચમે,
યજ્ઞેન કલ્પતામ્ ॥ ગર્ભાચમે, વત્સાચમે, ત્રયવિચ્ચમે, ત્રયવી
ચમે, દિત્યવાટ્ ચમે, દિત્યૌહીચમે, પઞ્ચાવિચ્ચમે, પઞ્ચાવીચમે,
ત્રિવત્સાશ્ચમે, ત્રિવત્સશ્ચમે, તુર્યાવાટ્ચમે, તુર્યૌહીચમે,
પષ્ઠવાટ્ચમે, પષ્ઠૌહીચમે, ઉક્ષાચમે, વશાચમે, અનડ્વાંશ્ચમે,
ધેનુશ્ચમે, ઋષભશ્ચમે, વેહચ્ચમે ॥

એકાચમે, તિસ્રશ્ચમે, તિસૃશ્ચમે, ત્રયસ્ત્રિંશચ્ચમે,
ચતસ્રશ્ચમે, અષ્ટૌચમે, અષ્ટચમે, અષ્ટાચત્વારિંશચ્ચમે,
વાજશ્ચ, પ્રસવશ્ચાઽપિજશ્ચ ક્રતુશ્ચ વાક્પતિશ્ચ વસુશ્ચ
સ્વર્મોર્ધો મૂર્ધ્વા વૈયશનો વ્યશ્વાઁન આન્ત્યોઽન્ત્યો ભૌવનો ભુવનસ્ય
પતિઃ પ્રજાપતિરધિપતિરિયન્તે રાણ્મિત્રો યન્તાસિ યમન ઊર્જેત્વા વૃષ્ટ્યૈ ત્વા
પ્રજાનાં ત્વાઽધિપત્યાય, આયુર્યજ્ઞેન કલ્પતાં, મનો યજ્ઞેન કલ્પતાં,
પ્રાણો યજ્ઞેન કલ્પતાં, ચક્ષુર્યજ્ઞેન કલ્પતાં, શ્રોત્રં યજ્ઞેન
કલ્પતાં, વાગ્યજ્ઞેન કલ્પતામાઽઽત્મા યજ્ઞેન કલ્પતાં બ્રહ્મા યજ્ઞેન
કલ્પતાં, પૃષ્ઠં યજ્ઞેન કલ્પતાં, યજ્ઞો યજ્ઞેન કલ્પતામ્ ॥

ઋક્ચ સામશ્ચ સ્તોમશ્ચ યજુશ્ચ બૃહદ્રથન્તરશ્ચ સ્વર્દેવા અગન્મ

પ્રજાપતેઃ પ્રજા અભૂવન્નઽમૃતા અભૂમ વેટ્સ્વાહા ॥

“વાજસ્ય નુ પ્રસવા ઇતિ ષટ્” ॥

ૐ વિશ્વે અદ્ય મરુતો વિશ્વ ઊતીર્વિશ્વે ભવન્ત્વઽગ્નયઃ સમિદ્ધાઃ ।
વિશ્વે માદેવા અવસા ગમન્નિહ વિશ્વમસ્તુ દ્રવિણં વાજે અસ્મિન્ ।
આ (૧) મા વાજસ્ય વાજસ્યનુ (૨) વાજો મા સપ્ત પ્રદિશશ્ચતસ્રો વા પરાવતઃ ।
(૧ આધુનિકૈઃ કતિભિરન્વિષ્ટઃ પાઠોયમ્ - આ મા વાજસ્ય પ્રસવો
જગમ્યાદાઽમા દ્યાવાપૃથિવી વિશ્વરૂપે । આ મા ગન્તાં પિતરા માતરા ચા
મા સોમો અમૃતત્વેન ગમ્યાત્ ॥ ૨ ॥ વાજસ્ય નુ પ્રસવે માતરં મહીમદિતિં
નામ વચસા કરામહે । યસ્યામિદં વિશ્વં ભુવનમાવિવેશ તસ્યાં નો દેવઃ
સવિતા ધર્મસાવિષત્.)

વાજો મા વિશ્વૈર્દેવૈર્ધનસાતા ઇહાવતુ, વાજો મે અદ્ય પ્રસુવાતિદાનં
વાજો દેવાન્હવિષા વર્ધયાતિ, વાજસ્ય હિ
પ્રસવેનાન્નમિતિ વિશ્વા આશા વાજપતિર્જયેયમ્,
વાજઃ પુરસ્તાદુત મધ્યતો નો વાજો દેવાનૃતુભિઃ કલ્પયાતિ, વાજસ્ય હિ
પ્રસવેનાન્નમેતિ સર્વા આશા વાજપતિર્ભવેયમ્ ॥

સં મા સૃજામિ પયસઃ પૃથિવ્યાઃ સં મા સૃજામ્યદ્ભિરૌષધીભિઃ
સોઽહં વાજસ્ય નૌમ્યગ્નેઃ ॥ “તેજોઽસિ” ॥

પયઃ પૃથિવ્યાં પય ઓષધીષુ પયો દિવ્યન્તરિક્ષે પયોધાઃ ।
પયસ્વતીઃ પ્રદિશઃ સન્તુ મહ્યમ્ ॥ તર્પણમ્ ॥

મદ્યં પીત્વા ગુરુદારાંશ્ચ ગત્વા સ્તેયં કૃત્વા બ્રહ્મહત્યાં વિધાય ।
ભસ્મચ્છન્નો ભસ્મશય્યાં શયાનો રુદ્રાધ્યાયી મુચ્યતે સર્વપાપૈઃ ॥

નિત્યં દણ્ડી નિત્યયજ્ઞોપવીતી નિત્યં ધ્યાત્વા ભસ્મના કર્મબન્ધી ।
રુદ્રં દૃષ્ટ્વા દેવમીશાનમુગ્રં યાતિ સ્થાનં તેન સાકં તદીયમ્ ॥

અનેન મન્ત્રપાઠેનાત્મનો વાઙ્મનઃકાયોપાર્જિતપાપનિવારણાર્થમમુક-
કામનાસિદ્ધ્યર્થં, ભગવાન્, ભવો દેવઃ ૮ શતરુદ્રેશ્વરઃ,
મૃત્યુઞ્જયભટ્ટારકઃ પાર્વતીસહિતઃ પરમેશ્વરઃ પ્રીયતાં પ્રીતોઽસ્તુ ॥

ઇતિ ચમપટકમન્ત્રસૂક્તં તૃતીયમ્ ।

# રુદ્રપઞ્ચકમ્

## સૌમારુદ્રમન્ત્રસૂક્તં ચતુર્થમ્

ૐ વન્દે રુદ્રમુમાપતિં સુરગુરું વન્દે જગત્કારણં
વન્દે પન્નગભૂષણં શશિધરં વન્દે પશૂનાં પતિમ્ ।
વન્દે સૂર્યશશાઙ્કવહ્નિનયનં વન્દે મુકુન્દપ્રિયં
વન્દે શૈલસુતામનોહરતરં વન્દે શિવં શઙ્કરમ્ ॥

(ૐ સૌમારુદ્રમિતિ ઈશ્વરો ભ્રાતૃવ્યઃ, બ્રાહ્મણાનિ સુમન્તોઃ કશ્યપસ્ય બ્રહ્મણશ્ચ) ॥

ૐ સૌમારુદ્રં ચરું નિર્વપેચ્છુક્લાનાં વ્રીહીણામ્ શ્વેતાયાઃ શ્વેતવત્સાયા આજ્યં મથિતં સ્યાત્તસ્મિન્બ્રહ્મવર્ચસકામઃ, સ્વર્ભાનુર્વા આસુરઃ સૂર્યન્તમસાऽવિધ્યત્સ ન વિરોચત, તસ્મૈ દેવાઃ પ્રાયશ્ચિત્તિમૈચ્છંસ્તમેતયેષ્ટ્યા યાજયંસ્તયા। સ્માત્તમોऽપાઘ્નંસ્તમસૈવ પ્રાવૃતો યોऽલં બ્રહ્મવર્ચસાય તત્ર બ્રહ્મવર્ચસ્વીભવતિ, તમ એવાસ્માદऽપહન્તિ બ્રહ્મવર્ચસેનૈનં સંસૃજતિ, શ્વેતાયાઃ શ્વેતવત્સાયા આજ્યં ભવતિ શુક્લા વ્રીહય એવમિવ વૈ બ્રહ્મવર્ચસં બ્રહ્મવર્ચસમેવ સન્દદાતિ ॥

ધૃતેન પ્રોક્ષન્તિ ધૃતેન માર્જયન્તિ શાન્ત્યૈ શાન્તિર્હ્યાપોऽપ્યસ્ય તાં રાત્રીમાऽપો ગૃહાન્નાવહરેયુઃ પરિશ્રિતે યજેત બ્રહ્મવર્ચસસ્ય પરિગૃહીત્યૈ પ્રાદેશમાત્રશ્ચરુરૂર્ધ્વો ભવત્યેવં તિર્યઙ્ેતાવાન્વૈ પુરુષો યાવદસ્ય પ્રાણાં અભિ યાવાનેવાસ્યાત્મા તસ્માત્તમોऽપહન્તિ, સાકં રશ્મિભિઃ પ્રચરન્ત્યસા એવાસ્માદાદિત્ય ઉદ્યંસ્તમોऽપહન્તિ તિષ્યાપૌર્ણમાસે યજેત, તિષ્યો વૈ રુદ્રશ્ચન્દ્રમાઃ સોમઃ સૌમીરતઃ પ્રાચીનમોષધયો રૌદ્રીઃ પ્રાતીચીનમોષધયો રાત્રીઃ પ્રતીચીનં પુષ્યન્તિ પ્રાચીનં શુષ્યતિ પ્રતીચીન પ્રત્યક્ષમેવૈના ઋધ્નોતીશ્વરો દુશ્ચર્મા ભવતોર્ય એતયા યજેતેऽતીવ સ્વસ્માદપહન્તિ, મનોરૃચઃ સામિધીનીષ્વऽપ્યનુબ્રૂ યાન્મનુર્વા

યત્કિઞ્ચાઽવદત્તદ્ભેષજમાસીદ્ભેષજમેવાસ્મૈ કરોત્યપક્ષરન્તિ સિન્ધવે,
મયોભુવ ઇતિ નરાશંસ્યા પરિદદાતિ શાન્ત્યૈ ષટ્પદા ભવન્તિ ષડ્વા
ઋતવ ઋતુષ્વેવ પરિતિષ્ઠતિ ॥

ઈશ્વરસ્તુ તદતિદુર્ચર્મૈવ ભવતોસ્તેજાંસિ હ્યેષ પ્રત્યારોહન્નિતિ
સૌમાપૌષ્ણઞ્ચરું પશુકામોઽનુનિર્વપેત્સોમો વૈ બ્રાહ્મણસ્ય સ્વા
દેવતાઃ પશવઃ પૂષા સ્વામેવ દેવતાં પશુભિર્બંહયતે ત્વચમેવ
કુરુતે સૌમારુદ્રઞ્ચરું નિર્વપેત્ કૃષ્ણાનાં વ્રીહીનામભિચરન્સોમો
વા આસાં પ્રજાનામધિપતી રુદ્રોઽગ્નિરધિપતિર્વધ્યસ્ય ચાવધ્યસ્ય
ચેશેઽધિપતિમેવૈનં નિર્યાશ્ય રુદ્રાયાપિદધાતિ કૃષ્ણાનાં વ્રીહીણાં
ભવતિ, કૃષ્ણમિવ વૈ તમસ્તમે મૃત્યુર્મૃત્યુનૈવૈનં ગ્રાહયતિ
શરમયં બર્હિઃ શીત્યૈ વૈભીતયા ઇધ્મો વિભિત્યૈ સૌમારુદ્રં ચરું
નિર્વપેત્ ॥

ભ્રાતૃવ્યતાયૈવાઽદ્વિતીયતાયૈ વા તસ્યાર્ધમર્ધં સર્વં સ્યાદઽર્ધં
શુક્લાનાં બ્રીહીણાં સ્યાદઽર્ધં કૃષ્ણાનામર્ધં શરમયં બર્હિષોઽર્ધં
દર્ભમયમર્ધણ્ વૈભીતકમિધ્મસ્યાર્ધમન્યસ્ય વૃક્ષસ્ય સોમો વૈ
બ્રાહ્મણસ્ય સ્વા દેવતા સ્વાયામેવાસ્મૈ દેવતાયાં દ્વિતીયં જનયતિ યદર્ધમર્ધં,
દ્વિતીયત્વાયૈવ તત્સૌમારુદ્રં ચરું નિર્વપેત્ પયસ્યામયાવિનઃ સૌમ્યો
વૈ જીવન્નાગ્નેયઃ પ્રમીતો નૈવ જીવો ન મૃતો ય આમયાવી તયોરેવૈનં
ભાગધેયેન નિષ્ક્રીણાતિ ॥

પયસિ ભવતિ પયો વ પયઃ પયઃ પુરુષઃ પય એતસ્યામયતિ યસ્યામયતિ
પયસૈવાસ્ય પયઃ સ્પૃણોતિ પ્રસિતં વા એષ એતં સૌમારુદ્રયોર્નિષ્વદતિ
યો હોતા ભવતિ સ ઈશ્વરઃ પ્રમીતો અનુડ્વાહં તસ્મૈ દદ્યાત્તં
હન્યાત્તસ્યાશ્નીયાત્સૈવ તત્ર પ્રાયશ્ચિત્તિઃ સૌમારુદ્રઞ્ચરું નિર્વપેત્ પ્રજાકામો
વા પશુકામો વા સોમો વૈ રેતોધા રુદ્રોઽગ્નિઃ સ પ્રજનયિતા સોમ એવાસ્મૈ રેતો
દધાત્યગ્નિઃ પ્રજનયતિ વિન્દતે પ્રજાં વા પશૂન્વા યતરસ્મૈ
કામાય નિર્વયતિ ॥

“સૌમારુદ્રચતુષ્કં ભારદ્વાજઃ સૌમારુદ્રસ્ત્રિષ્ટુપ્” ૐ સૌમારુદ્રા
ધારયેથામસૂર્યં પ્રવામિષ્ટયોરમશ્નુવન્તુ, દમે દમે સપ્તરત્ના દધાના
શં નો ભૂતં દ્વિપદે શં ચતુષ્પદે ॥ ૧॥

સૌમારુદ્રા વિવૃહતં વિષૂચીમમીવા યા નો ગયમાવિવેશ ।

આરે બાધેથાં નિરૃતિં પરાચૈરસ્મે ભદ્રા સૌશ્રવસાનિ સન્તુ ॥ ૨॥

સૌમારુદ્રા યુવમેતાન્યસ્મૈ વિશ્વા તનૂષુ ભેષજાનિ ધત્તમ્ ।
અવસ્યતં મુઞ્ચતં યન્નો અસ્તિ તનૂષુ બદ્ધં કૃતમેનો અસ્માત્ ॥ ૩॥

“તેજોઽસિ”।
તિગ્માયુધૌ તિગ્મહેતી સુશેવૌ સૌમારુદ્રાવિવ સુમૃડતં નઃ ।
પ્રનો મુઞ્ચતં વરુણસ્ય શાદ્ગોપાયતં નઃ સુમનસ્યમાનાઃ ॥

ઇતિ સૌમારુદ્રમન્ત્રસૂક્તં ચતુર્થમ્ ।

# રુદ્રપઞ્ચકમ્

## દીક્ષામન્ત્રસૂક્તં પઞ્ચમમ્

ॐ શાન્તં પદ્માસનસ્થં શશધરમુકુટં પઞ્ચવક્ત્રં ત્રિનેત્રં
શૂલં વજ્રં ચ ખડ્ગં પરશુમભયદં દક્ષભાગે વહન્તમ્ ।
નાગં પાશં ચ ઘણ્ટાં ડમરુકસહિતં સાઙ્કુશં વામભાગે
નાનાલઙ્કારયુક્તં સ્ફટિકમણિનિભં નૌમિ દક્ષં મહેશમ્ ॥

“દીક્ષયા ત્વા પરિમિત્યેતિ પઞ્ચૈતે પ્રાજાપત્યસ્ય યેન દેવા
જ્યોતિષ્યેતિ, સંવર્તસ્યાઙ્ગિરસસ્ય યાવદ્બ્રહ્મણઃ” ॥

ॐ દીક્ષયા વિરાડાપ્તવ્યસ્તિસ્ત્રો રાત્રીર્દીક્ષિતઃ સ્યાત્ત્રિપદા વિરાડ્વિરાજમેવાપ્નોતિ,
ષડ્રાત્રીર્દીક્ષિતઃ સ્યાત્ ષડ્વાઋતવઃ સંવત્સરઃ સંવત્સરો
વિરાડ્વિરાજમેવાપ્નોતિ, દશરાત્રીર્દીક્ષિતઃ સ્યાદ્દશાક્ષરા
વિરાડ્વિરાજમેવાપ્નોતિ, દ્વાદશરાત્રીર્દીક્ષિત સ્યાદ્દ્વાદશમાસાઃ સંવત્સરઃ
સંવત્સરો વિરાડ્વિરાજમેવાપ્નોતિ, ત્રયોદશરાત્રીર્દીક્ષિતઃ સ્યાત્ત્રયોદશ માસાઃ
સંવત્સરઃ સંવત્સરો વિરાડ્વિરાજમેવાપ્નોતિ, પઞ્ચદશરાત્રીર્દીક્ષિતઃ
સ્યાત્પઞ્ચદશાર્ધમાસસ્ય રાત્રયોઽર્ધમાસશઃ સંવત્સર આપ્યતે સંવત્સરો
વિરાડ્વિરાજમેવાપ્નોતિ, સપ્તદશરાત્રીર્દીક્ષિતઃ સ્યાદ્દ્વાદશ માસાઃ પઞ્ચર્તવઃ
સંવત્સરઃ સંવત્સરો વિરાડ્વિરાજમેવાપ્નોતિ, ચતુર્વિંશતિરાત્રીર્દીક્ષિતઃ
સ્યાચ્ચતુર્વિંશતિઃ સંવત્સરસ્યાર્ધમાસા રાત્રયોઽર્ધમાસશઃ સંવત્સર
આપ્યતે સંવત્સરો વિરાડ્વિરાજમેવાપ્નોતિ, ત્રિંશતં રાત્રીર્દીક્ષિતઃ
સ્યાત્ત્રિંશદક્ષરા વિરાડ્વિરાજમેવાપ્નોતિ ॥

માસન્દિક્ષિતઃ સ્યાદ્યો વૈ માસઃ સંવત્સરઃ સંવત્સરો વિરાડ્વિરાજમેવાપ્નોતિ,
ચતુરો માસો દીક્ષિતઃ સ્યાચ્ચતુરો વા એતં માસો વસવોઽબિભરુસ્તે
પૃથિવીમાજયગ્ગાયત્રીં ચ્છન્દોષ્ટૌ રુદ્રાસ્તેઽન્તરિક્ષમાજયંસ્ત્રિષ્ટુભં
ચ્છન્દો દ્વાદશાદિત્યાસ્તે દિવમાજયઞ્જગતીચ્છન્દસ્તતો
વૈ તે વ્યાવૃતમાગચ્છઞ્શ્રૈષ્ઠ્યન્દેવાનાં

તસ્માદ્દ્વાદશમાસો ભૂત્વાગ્નિશ્ચિન્વીત દ્વાદશમાસાઃ સંવત્સરઃ
સંવત્સરોગ્નિર્વૈશ્વાનરસ્તસ્યાહોરાત્રાણીષ્ટક-આપ્તેષ્ટકમેવૈચ્ચિનુત ઋધ્નોતિ
વ્યાવૃતમેવ ગચ્છતિ શ્રૈષ્ઠ્યં સમાનાનાં ગાયત્રં પુરસ્તાદ્ગાયતિ,
શિરો વૈ દેવાનાં ગાયત્રં ગાયત્રોગ્નિસ્તસ્માદ્ગાયત્રં પુરસ્તાદ્ગાયતિ ॥

આગ્નિપાવમાન્યામયં વા વયઃ પવતે સ પ્રાણો મુખન્દેવાનામગ્નિર્મુખત એવ
પ્રાણન્દધાતિ, તસ્માન્મુખતઃ પ્રાણો રથન્તરમુત્તરાદ્ગાયતિ બૃહદ્દક્ષિણતઃ
પક્ષ એવાસ્યોપદધાતીયં વૈ રથન્તરમસૌ બૃહદાભ્યામેવૈનં
પરિગૃહ્ણાતિ યજ્ઞાયજ્ઞીયં પુચ્છે ગાયતિ, શ્રોણ્યાં વામદેવ્યમાત્મા
વૈ યજ્ઞાયજ્ઞીયન્તનૂર્વામદેવ્યમાત્માનમેવૈનં સતનૂશ્ચિનુતે હૃદયમપિ
કક્ષે તસ્માદપિ કક્ષે હૃદયમનૃચં ભવતિ તસ્માદાનસ્થકં
હૃદયમર્થ્યૈ પરિગાયત્યર્કો વા અગ્નિરર્કમેવાર્થ્યૈઃ પરિગાયતિ શાન્ત્યૈ ॥

સંવત્સરો વા અન્તરતમઃ સ્વર્ગં લોકં જ્યોતિષ્મતીરેતાઃ સાહ સ્રીરિષ્ટકા
યદ્ધિરણ્યશુલ્કૈઃ પ્રોક્ષતિ જ્યોતિષ્યૈવાસ્મૈ સંવત્સરં વિવાસયતિ
સહસ્રસ્ય પ્રમાસિ સહસ્રસ્ય પ્રતિમાસીતિ સહસ્રસમ્મિતા હીમે લોકા
ઘ્નન્તિ વા એતદગ્નેર્યદસ્યાત્ર ન ક્રિયતે યન્ન ચીયતેઽમૃતં હિરણ્યં
યદ્ધિરણ્યશુલ્કૈઃ પ્રોક્ષત્યમૃતેનૈવાસ્ય તન્વં પૃણન્તી સા મે અગ્ન
ઇષ્ટકા ધેનવઃ સન્ત્વિતિ ધેનૂરેવૈનાઃ કુરુતે તા એનં કામદુઘા અમુષ્મિંલ્લોકે
ઉપતિષ્ઠન્તે રુદ્રં વૈ દેવા યજ્ઞાન્નિરભજન્ સ દેવાનાયતયાભિપર્યાવર્તત
તે દેવા એતચ્છતરુદ્રિયમપશ્યંસ્તેનૈનમશમયન્ યચ્છતરુદ્રિયઞ્જુહોતિ
તેનૈવૈનં શમયતિ ॥

જાનુદઘ્નેઽગ્ને જુહોત્યસ્યા એવ રુદ્રમવજયતેઽથ નાભિદઘ્નેન્તરિક્ષાદેવ
રુદ્રમવયજતેઽથ પુરુષમાત્રેમુષ્યા એવ રુદ્રમવયજત, ઇત એવોર્ધ્વં
રુદ્રમવયજતેઽથ પુરુષમાત્રેથ નાભિદઘ્નેથ જાનુદઘ્નેઽમુતએવાર્વઞ્ચં
રુદ્રમવયજતે તત્ષટ્ સમ્પદ્યતે ષડ્ભ્યાઋતુભ્ય એવ રુદ્રન્નિરવયજતે
ગવીધુકાસક્તુભિર્વાજર્તિલૈર્વા મૃગક્ષીરેણ વા જુહોતિ યદ્ગ્રામ્યેન
જુહુયાદ્ગ્રામ્યાવચારિણં રુદ્રં કુર્યાદારણ્યેનૈવારણ્યમભિરુદ્રં નિરવયજતે
॥

અર્કપર્ણેન જુહોત્યર્કો વાગ્નિરર્કેગૈવૈનમર્કાદધિ નિરવયજત ઉત્તરસ્ય
પક્ષસ્ય યા ચરમેષ્ટકા તસ્યાં જુહોત્યેષા વૈ રુદ્રસ્ય દિક્, સ્વાયામેવ
દિશિ રુદ્રં પ્રતિગૃહ્યાવયજતે પશુર્વા અગ્નિરેતર્હિ વા એષ જાયતે યર્હિ

ચીયતે યથા વત્સો જાતઃ સ્તનં પ્રેપ્સતિ એવં વા એષ એતર્હિ ભાગધેયં
પ્રેપ્સતિ સ યજમાનં ચૈવાધુર્યું ચ ધ્યાયતિ, યચ્છતરુદ્રિયં જુહોતિ
ભાગધેયેનૈવૈનં શમયતિ ॥

અઙ્ગિરસો વૈ સ્વર્ગંલોકં યન્તસ્તે જાયાં ધર્મં પ્રાસિઞ્ચન્સા શોચન્તી
પર્ણં પરામૃશત્સોભવત્તદર્કસ્યાર્કત્વં યદર્કપર્ણેન જુહોતિ
સ યોનિત્વાય યન્દ્વિષ્યાત્તસ્ય સઞ્ચરે પશૂનાં ન્યસેદ્યઃ પ્રથમઃ
પશુરાક્રમતિ ત આર્તિમાર્ચ્છન્તિ યા ઉત્તમાસ્તાં યજમાનં વાચયેદેતા
વૈ દેવતાઃ સ્વર્ગ્યાસ્તાભિરેવ સ્વર્ગલોકમિત્યેતા વૈ દેવતા અભિચરણેયા
યન્દ્વિષ્યાત્તં બ્રૂયાદમું વો જમ્ભે દધામિ "તેજોઽસિ" ઇત્યેતાભ્ય એવૈનં
દેવતાભ્ય આવૃશ્ચતિ તાદૃક્ પ્રપ્રધન્વતિ ॥

મદ્યં પીત્વેતિ તર્પણમ્ ॥

ઇતિ દીક્ષામન્ત્રસૂક્તં પઞ્ચમમ્ ।

ઇતિ રુદ્રપઞ્ચકં સમ્પૂર્ણમ્ ।

Proofread by Sneha Sudha snehasudha13 at gmail.com, NA

---

*Rudrapanchakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*